श्रीगणेशायनमः॥अथश्रीदक्षिणकालिकासं
क्षेपपद्धतिः॥तत्रश्रीमान्साधकेंद्रोब्राह्मेमुहूर्ते
उत्थायमुक्तःस्वापःरात्रिवासंत्यक्त्वाशय्यांत्यक्त्वाव्यौस
नेउपविश्यशिरःसिसहस्रदलकमलकर्णिकायां
स्थितंश्वेतवर्णंद्विभुजंवराभयकरंश्वेतमाल्या
नुलेपनंस्वप्रकाशस्वरूपंस्ववामस्थितशक्ति
शक्त्यास्वप्रकाशस्वरूपयासहितंगुरुंभाव्य वि
मानसोपचारैराराधयेत्॥यथा॥ऐंलंपृथि

व्यात्मकंगंधंअमुकानंदनाथगुरवेनमः॥ऐंहंआका
शात्मकंपुष्पं॥ऐंयंवायव्यात्मकंधूपंअ॰॥ऐंरंवह्न्या
त्मकंदीपं॥ऐंवंअमृतात्मकंनैवेद्यं॥ऐंसंसर्व्यात्म
कंतांबूलं॥इतिमनसाराध्यऐंइतिचतुर्वारंजपना
मनासयावायुमापूर्यतस्यषोडशवारंजपेनकुंभक
कृत्वातस्याष्टवारंजपेनदक्षिणनासयावायुरेच
येत्॥पुनर्दक्षिणेनापूर्यौभाभ्यांकुंभयित्वावामे
नरेचयेत्॥पुनर्वामेनापूर्यौभाभ्यांकुंभयित्वाद

क्षिणेनरेचयेत्॥इत्येवंप्राणायामत्रयंकृत्वाऐंइति
॥२॥ यथाशक्तिजपत्वापुनःप्राणायामत्रयंकृत्वा॥गुह्या
तिगुह्यगोप्तात्वंगृहाणास्मत्कृतंजपम्॥सिद्धि भ
वतुमेदेवत्वत्प्रसादान्महेश्वर॥इतिगुरोर्दक्षिणक
रेतेजोमयंजपंनिवेद्यप्रणमेत्॥यथा॥अखंडमं
डलाकारंव्याप्तंयेनचराचरं॥तत्पदंदर्शितंयेनतस्मै
श्रीगुरवेनमः॥अज्ञानतिमिरांधस्यज्ञानांजनश
लाकया॥चक्षुरुन्मीलितंयेनतस्मैश्रीगुरवेनमः॥ ॥२॥

नमोस्तुगुरवेतुभ्यमिष्टदेवस्वरूपिणे॥यस्यवाग्म
तंहंतिविषंसंसारसंज्ञकं॥इतिगुरुंस्तुत्वाप्रणमेत्॥
ततोमूलादिब्रह्मरंध्रांतंमूलविद्यांकुंडलिनींध्याये
त्॥यथामूलेनकरषडंगोप्राणायामंचकृत्वायोनि
मुद्रांबध्वाश्वासंधृत्वामूलाधारेकुंडलिनींप्रबुद्ध
भुजगाकारंसार्धत्रिवलयस्थितांस्वयंभूलिंगवेष्टिनी
नीवारशूकसंकाशांतडित्कोटिसमप्रभांतांआधा
रपद्मात्हंसःइतुत्थाप्यसुषुम्णावर्मनाषट्चक्रा

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

णिमित्वाशिरसिस्थितसहस्रदलकमलकर्णिकांनिर्वा
॥३॥ निपरमात्मनिसंयोज्यपरब्रह्मसंसर्गजनितंक्रमेण
ह्रांह्रींह्रूंन्यासविधानमोहइतिमंत्रेणहृत्पद्मं
मेणस्वस्थानमानयेत्॥एवंत्रिवारंकृत्वाइष्टदेव
तांहृदंबुजेध्यात्वामनसाराध्यमूलेनप्राणप्रति
ष्ठांकृत्वामूलंयथाशक्तिजप्त्वापुनःप्राणप्रति
ष्ठांकृत्वा॥गुह्यातिगुह्यगोप्त्रित्वंगृहाणास्मत्कृतं
पं॥सिद्धिर्भवतुमेदेवित्वत्प्रसादान्महेश्वरि॥इति॥३॥

दत्वावामकरेतेजोमयंजपंनिवेद्यएभिःश्लोकैःप्रा
र्थयेत्॥यथा॥त्रैलोक्यचैतन्यमयादेविश्रीगु
रुरित्वच्चरणाज्ञयैव॥प्रातःसमुत्थायतवप्रियार्थं
संसारयात्रामनुवर्तयिष्ये॥संसारयात्रामनु
वर्तमानंलक्षाज्ञयावीरजनाभिवंद्ये॥स्पर्द्धातिर
स्कारकलिप्रमादभयानिमांमाभिभवंतुदेवि॥जा
नामिधर्मंनचमेप्रवृत्तिर्जानाम्यधर्मंनचमेनिर
वृत्तिः॥त्वयेंद्रियाणामधिदेवतेनयथानियुक्तोस्मित

थाकरोमिइतिसुखाप्रणमेत्॥इतिप्रातःकृत्यं॥अथ
॥४॥ स्नानं॥यथा॥कुशपुष्पाण्यादायनद्यादौगत्वाम ल
स्नानंवैदिकंस्नानंचकृत्वातांत्रिकेनविधिनास्ना
यात्॥यथा॥अंअंद्येत्यादिअमुकगोत्रोमुकदेवशर्मा
मुकदेवताप्रीतयेतांत्रिकस्नानंकरिष्ये॥इतिसंक
ल्प्यमूलेनकरांगन्यासोप्राणायामंकृत्वाॐ ब्रह्मा
डोदरतीर्थानिकरैस्पृष्टानितेरवे॥तेनसत्येनमेदेव
तीर्थंदेहिदिवाकर॥क्रोंइत्यंकुशमुद्यासूर्यमंडला ॥४॥

तीर्थान्याकृष्यॐगंगेचयमुनेचैवगोदावरिसरस्वति॥
नर्मदेसिंधुकावेरिजलेस्मिन्सन्निधंकुरु॥इतिपुरः
स्थितजलेसंयोज्यवंइतिधेनुमुद्यामृतीकृत्यहुं
तिअवगुंठ्यफट्इतिसंरक्ष्यमूलेनैकारशधामि
मंत्र्यसूर्याभिमुखंद्वादशधावारिनिःक्षिप्यतस्मिन्नि
ष्टदेवताचरणान्निःसृतजलेमूलेनत्रिर्निमज्यइष्ट
देवताध्यायनमूलंयथाशक्तिजपेउन्मज्यमूलेन
त्रिराचम्यमूलेनजलंजलित्रयंमूर्ध्निनिःक्षिप्य

ततः संहारमुद्रयादेवीहृद्यानीयतीर्थानिमंत्रैर्विसर्जयेत्॥४

मूलंअमुकदेवींतर्पयामिस्वाहेतिवामहस्तकुनतत्व
॥५॥ मुद्रेपरिदक्षिणहस्तेनत्रिस्तर्पयित्वामूलेनत्रिवारमा
त्मानंप्रोक्ष्यउदकेनत्रिवारजप्तेनकुलशमुद्रयात्रि
रात्मानमभिषिंच्यद्विराचामेत्॥ततोजलादुत्थायव
सनंपरिधायद्विराचम्यभस्मादिधारणंकुर्यात्॥इ
तिस्नानं॥अथवैदिकसंध्यानंतरंतांत्रिकसंध्याकु
र्यात्॥यथा॥ॐआत्मतत्वायस्वाहा॥ॐविद्यातत्वा
यस्वाहा॥ॐशिवतत्वायस्वाहा॥इतित्रिभिर्मंत्रैस्त्रि ॥५॥

रपःपीत्वाआस्यनासेक्षणश्रोत्रनाभिवक्षःशिरोंसान्स्प
ष्टाहस्तंप्रक्षाल्य॥ततःपुरस्थितजलेस्नानवद्ब्रह्मांडो
दरेतितीर्थान्यावाह्यवइतिधेन्वामृतीकृत्यकुशयु
ग्मेनतत्वमुद्रयावामूलेनत्रिवारंभूमौजलंनिःक्षिप्य
सप्तधातज्जलेनकुशयुग्मेनतत्वमुद्रयावामूलेन
मूर्धानमभिषिंचेत्॥ततः॥मूलेनकरषडंगौकृत्वा
वामहस्तेजलंनिधायदक्षिणपाणिनाछाद्यहृदयं
वंवंइतिपंचभिर्बीजैस्त्रिरपोभिमंत्र्यमूलमुच्चार्य

गलितोदकबिंदुभिस्तत्वमुद्रयासप्तधामूर्धानंसंसिं
॥६॥ च्यत्रोषज्जलंदक्षिणहस्तेसमादायतेजोरूपंध्यात्वाद्
उद्याकुंड्यदेहांतःपापंक्षाल्यकृत्स्नवर्णंतदुद्भवं
ग पिंठालयाविरेच्यपुरःकल्पितवज्रशिलायांफडिति
ताडयेत्॥ततोहस्तंप्रक्षाल्याचम्य॥ॐहंसःमार्तंड
भैरवायप्रकाशशक्तिसहितायश्रीसूर्यायइदमर्घ्यं
स्वाहा॥इत्यादित्यायार्घ्यत्रयंदत्वासूर्यमंडलेदेवतांवि
भाव्य॥उद्यदादित्यमंडलमध्यवर्तिन्यैनित्यचैतन्यो ॥६॥

दितायेश्रीदक्षिणकालिकायेइदमर्घ्यंस्वा॥इतिमंत्रेण
सूर्यमंडलस्थायेदेवतायेअर्घ्यत्रयंदत्वातर्पयेत्॥यथा॥
ॐदेवांस्तर्पयामि॥ॐऋषीस्तर्पयामि॥ॐपितॄंस्त
र्पयामि॥ॐगुरुंतर्पयामीतित्रिवारंगुरुंप्रतर्प्यनतः॥
ॐपरमगुरुंतर्पयामि॥ॐपरापरगुरुंतर्पयामि॥न
तःस्नानवद्दिष्टदेवतांस्तर्पयित्वागायत्रींध्यायेत्॥
यथा॥उद्यदादित्यसंकाशांपुस्तकाक्षधरांस्मरेत्॥
कृष्णाजिनधरांब्राह्मींध्यायेत्तारकितेंबरे॥इतिध्या

त्रीगायत्रींजपेत्॥यथा॥ॐकालिकायैविद्महेश्मशान
॥७॥ वासिन्यैधीमहि॥तन्नोघोरेप्रचोदयात्॥इतिमूलगा
यत्रीयथाशक्तिजप्त्वामूलेनप्राणायामत्रयंकृत्वा
मूलअष्टोत्तरशतंजप्त्वापुनःप्राणायामत्रयंकृत्वा
गुह्येतिमंत्रेणपूर्ववद्देवतायैजपंनिवेद्यदेवतांगुरुंच
नत्वाचम्यसंहारमुद्रयासूर्यमंडलस्थांदेवतांसह
द्यानीयतीर्थंनिसूर्यमंडलेविसर्जयेत्॥इतिप्रातः
संध्या॥मध्याह्नसंध्यायांगायत्रीध्यानेविशेषः॥य ॥७॥

था॥श्यामवर्णांचतुर्बाहुंशंखचक्रलसत्करां॥गदापद्म
धरांदेवींसूर्यासनकृताश्रयां॥अन्यत्सर्वंपूर्ववत्॥सा
यांह्नेतुदेवतार्घ्यदानांतंकर्मकृत्वागायत्रीध्यायेत्॥य
था॥सायाह्नेवरदांदेवींगायत्रींसंस्मरेद्यतिः॥श्वेतां
ह्नांवरधरांवृषासनकृताश्रयां॥त्रिनेत्रांवरदांपाशंशू
लंचक्रकरोटिकां॥सूर्यमंडलमध्यस्थांध्यायेदेवींसम
भ्यसेत्॥इतिध्यानं॥तर्पणवर्जंसर्वंप्रातःसंध्यावत्॥इ
तित्रिकालसंध्या॥अथमान्यान्प्रणम्यप्रबुद्धानं रवि

ग्रहांहृत्कमलकर्णिकासीनांइष्टदेवतांस्मरन्नुदकपूर्ण
॥८॥ पात्रंकरेगृहीत्वादिग्बंधंकृत्वापश्यन्नोनीक्षिंचिन्निरी
तनेत्रोनामानिस्त्रोत्रेणवाजपन्नहमागच्छहस्तौपादौ
प्रक्षाल्यमंत्रआचमनंकुर्यात्॥यथा॥क्रीं क्रीं क्रीं इति
त्रिभिःपीत्वा॥ॐकाल्यैनमः॥ॐकपालिन्यैनमः॥इति
द्विरुन्मृज्य॥ॐकुल्लायैनमः॥इतिकरंप्रक्षाल्य॥ॐ
कुरुकुल्लायैनमः॥मुखे॥ॐविरोधिन्यैनमः॥दक्षिण
नासायां॥ॐविप्रचित्तायै नमः॥वामनासायां॥ॐ ॥

उग्रायैनमः॥दक्षनेत्रे॥ॐउग्रप्रभायैनमः॥वामनेत्रे॥
ॐदीप्तायैनमः॥दक्षिणकर्णे॥ॐनीलायैनमः॥वामक
र्णे॥ॐघनायैनमः॥नासयोः॥ॐबलाकायैनमः॥वक्षसि॥
ॐमात्रायैनमः॥शिरसि॥ॐमुद्रायैनमः॥दक्षांसे॥ॐ
मित्रायैनमः॥वामांसे॥इतिमंत्रआचमनंकृत्वासामान्या
र्घ्यंकुर्यात्॥यथा॥स्वबामेत्रिकोणवृत्तभूर्विबंविलिख्य॥
ॐआधारशक्तयेनमः॥इतिगंधपुष्पाभ्यांमंडलंसंपूज्य
फडितिसर्घ्यपात्रंप्रक्षाल्यसाधारंतत्रनिधायनमस्कृत्यं

भसापूर्यपूर्ववत्तीर्थान्यावाह्यॐइतिगंधपुष्पैर्निःक्षि
॥९॥ प्यवंइतिधेन्वामृतीकृत्यॐइतिरक्षाधाजपेत्तोत
नोदकेनफडितिपूजामंडपद्वारमभ्युक्ष्यद्वारपूजा
मेत्तु॥यथा॥ऊर्ध्वेउंबरे॥ॐविघ्नेशायनमः॥तस्य
दक्षिणवामपार्श्वयोः॥ॐमहालक्ष्म्यैनमः॥ॐसर
स्वैनमः॥द्वारस्यदक्षिणवामशाखयोःक्रमेणैकैकपू
जयेत्॥यथा॥गंगणेशायनमः॥क्षांक्षेत्रपालायन
मः॥बांबटुकायनमः॥मांयोगिनीभ्योनमः॥अंगंगा ॥९॥

यैनमः॥ॐयमुनायैनमः॥देहल्यां॥ओंअस्त्रायनमः॥
इत्यंतान्द्वारदेवा न्संपूज्यदक्षिणपार्श्वपुरःसरंवामशा
खांस्पृशन्दक्षिणांगंसंकोचयन्मंडपांतःप्रविश्यने
त्रेत्यां॥ॐवास्तुपुरुषायनमः॥ॐब्रह्मणेनमः॥इति
संपूज्यदिव्यदृष्यावलोकनेनदेवतामंत्रेणदिव्यान्
विघ्नानुत्सार्यअस्त्रायफडितिजलेनांतरिक्षगान्
वामपादपार्ष्णिघातत्रयेणभौमान्विघ्नानुत्सार्यफडि
तिसप्तधाजप्त्वाविकिरानारायॐअपसर्पंतुते

भूतायेभूताभुविसंस्थिताः॥येभूताविघ्नकर्तास्तेन
॥९०॥ स्यंतुशिवाज्ञया॥इतिताम्विकिरेत्॥ततः क्रीं आधा
रशक्तिकमलासनायनमः॥इतिगंधपुष्पाभ्यांआ
सनंसंपूज्यधृत्वापठेत्॥आसनमंत्रस्यमेरुपृष्ठऋ
षिः॥सुतलंछंदः॥कूर्मोदेवता॥आसनपरिग्रहेविनि
योगः॥पृथिवित्वयाधृतालोकादेवित्वंविष्णुनाधृता॥
त्वंचधारयमांदेविपवित्रंकुरुचासनं॥इतिपठित्वास
नस्थिकादिक्रमेणोपविशेत्॥अत्रसंकल्पंकुर्यात्॥न ॥९०॥

सर्वज्ञसमाकृतः

तःस्वदक्षिणभागेपूजाद्रव्याणिवामेसुवासितांबुपूर्ण
कुंभंहस्तक्षालनार्थंपात्रांतरंपृष्ठेस्थापयेत्॥सर्वदि
क्षुघृतदीपान्प्रज्वाल्यकृतांजलिपुटोभूत्वास्ववामे॥
ॐगुरुभ्योनमः॥ॐपरमगुरुभ्योनमः॥ॐपरापर
गुरुभ्योनमः॥दक्षिणे॥ॐगणपतयेनमः॥मध्ये
मूलंतेभमुकदेवतायैनमः॥इतिनत्वा॥ततःफडि
तिमंत्रेणगंधपुष्पाभ्यांकरौसंमार्ज्यईशान्यांस्थको
ऊर्ध्वोर्ध्वतालत्रयंदत्वाहूंहंक्रींफट्॥इतिमंत्रेणछो

टिकाभिर्दिग्बंधनंकुर्यात्॥ततोरंइतिजलधारयाव
॥११ ह्निप्रकारंविचिंत्यभूतशुद्धिंकुर्यात्॥यथा॥स्वांगे
उन्नाभौकरौकृत्वाहंसइतिजीवात्मानंदीपकलिका
कारंमूलाधारस्थितंकुंडलिन्यासहसुषुम्णावर्त्म
नामूलाधारस्वाधिष्ठानमणिपूरकअनाहतवि
त्वा शुद्धाख्यषट्चक्राणिभित्त्वासहस्रारकमलकर्णिकांतर्गतपरमात्मनि
संयोज्यतत्रैवस्थित्यर्थंजीवात्माकारंगधरसरू॥११॥

पस्पर्शेत्रनेत्रनासिकाजिह्वाचक्षुस्त्वक्श्रोत्रवाक्पा
णिपादपायूपस्थप्रकृतिमनोबुध्यहंकारेतिचतुर्विंश
तितत्वानिलीनानिविभाव्य॥यंबीजंधूम्रवर्णंवामनासा
पुटेविचिंत्यतत्स्थषोडशवारंजपेनवायुनादेरमापूर्य
नासापुटेधृत्वातत्स्थचतुःषष्टिवारंजपेनकुंभकंकृत्वा
वामकुक्षिस्थितंपुरुषंकज्जलप्रभंब्रह्महत्यारि
रेफेनस्वर्णस्तेयभुजदृयंसुरापानहृदयंगुरुतल्पकटि
दृयं तत्संसर्गिपदद्वंद्वंअंगप्रत्यंगपातकंउपपातकंरो

माणंरक्तश्मश्रुविलोचनंरक्तचर्मधरंअधोमुखंक्रूरं
॥१२॥ गुष्ठपरिमाणंएवंविचिंत्यतेनसहशरीरंशोष्यतस्यहृ
त्त्रिराहारजपेनदक्षिणनासयावायुंरेचयेत्॥ततो
दक्षिणनासापुटेरंबीजंरक्तवर्णंध्यात्वाप्रतस्यषोड
शवारजपेनवायुमापूर्यनासापुटेधृत्वातस्यचतुःष
ष्टिवारजपेनकुंभकंकृत्वापापपुरुषेणसहदेहंदग्ध्वा
तस्यहृत्त्रिराहारजपेनवामनासयापापपुरुषभस्म
नासहवायुंरेचयेत्॥ततःठंबीजंशुभ्रवर्णंवामना ॥१२॥

सायांध्यात्वातस्यषोडशवारजपेनपूरकयोगेनललाटे
चंद्रंनीत्वावंइतिबीजस्यचतुःषष्टिवारजपेनतस्मा
ल्ललाटचंद्रात्कुलिनसुधयामातृकावर्णात्मिकयास
मस्तंदेहंविरच्यलंइतिबीजस्यहृत्त्रिराहारजपेनदेहं
सुदृढंविचिंत्यदक्षिणेनवायुंरेचयेत्॥ततःसोहंइति
जीवंकुंडलिनींपृथिव्यादीनिचयथास्थानमानयेत्॥
इतिभूतशुद्धिः॥ततोहृदिहस्तंदत्वाओंसोहंइतिप्राण
प्रतिष्ठांकृत्वामातृकान्यासंकुर्यात्॥यथा॥अस्यश्री

मात्रकामंत्रस्यब्रह्माऋषिः॥गायत्रीछंदः॥मात्रका
॥१३॥ सरस्वतीदेवता॥हलोबीजानि॥स्वराःशक्तयः॥अस्य
न्यासविनियोगः॥ब्रह्मणेऋषयेनमःशिरसि॥गा
यत्रीछंदसेनमःमुखे॥मात्रकासरस्वतीदेवतायैनमः
हृदि॥हल्भ्योबीजेभ्योनमःगुह्ये॥स्वरेभ्यःशक्तिभ्यो
नमःपादयोः॥अंकंखंगंघंङंआंअंगुष्ठाभ्यांनमः॥
इंचंछंजंझंञंईंतर्जनीभ्यांस्वाहा॥उंटंठंडंढंणंऊंमध्य
मांभ्यांवषट्॥एंतंथंदंधंनंऐंअनामिकाभ्यांहुं॥ओंपं

फंबंभंमंओंकनिष्ठिकाभ्योंवौषट्॥ अंयंरंलंवंशंष
संहंळक्षंअः करतलकरपृष्ठाभ्योंफट्॥ततःवक्ष्यमा
णषडंगमुद्राभिःषडंगंकुर्यात्॥यथाअंकंखंआंहृ
दयायनमः॥इंचंछंईंशिरसेस्वाहा॥उंटंठंऊंशिखा
येवषट्॥एंतंथंऐंकवचायहुं॥ओंपंफंओंनेत्रत्रया
यवौषट्॥अंयंरंलंवंशंषंसंहंळक्षंअःअस्त्रायफट्॥अथांतर्मात्रका
न्यासः॥यथा॥अंनमः॥आंनमः॥इत्यादिविसर्गांता
न्षोडशस्वरान्मादक्षिण्येनषोडशदलकमलेकंठस्

लेन्यसेत्॥कंनमः॥खंनमः॥इत्यादिठांतान्हृदयादि
र्णान्हृदयदलकमलेहृदिविन्यसेत्॥डंनमः॥ढंन
मः॥इत्यादिफांतान्दशवर्णान्दशदलकमलेनाभौ
विन्यसेत्॥बंनमः॥भंनमः॥इत्यादिलांतान्षड्वर्णा
न्षड्दलकमलेलिंगेविन्यसेत्॥वंनमः॥शंनमः॥
इत्यादिसांतान्चतुरोवर्णाश्चतुर्दलकमलेमूलाधा
रेविन्यसेत्॥हंनमः॥क्षंनमः॥इतिवर्णद्वयंद्विद
लकमलेभ्रूमध्येविन्यसेत्॥ततोध्यायेत्॥यथा॥९४॥

पंचाशल्लिपिभिर्विभक्तमुखदोःपद्मवक्षस्थलां
भास्वन्मौलिनिबद्धचंद्रशकलामापीनतुंगस्तनीं॥
मुद्रामक्षगुणंसुधाढ्यकलशंविद्यांचहस्तांबुजै
र्बिभ्राणांविशदप्रभांत्रिनयनांवाग्देवतामाश्रये॥एवं
ध्यात्वान्यसेत्॥यथा॥अंनमः॥इत्यनामामध्यमा
भ्यांललाटे॥आंनमः॥ताभ्यामेवमुखवृत्ते॥इंनमः॥
इतितर्जनीमध्यमानामिकाभिर्दक्षिणनेत्रे॥ईंनमः॥
इतिताभिरेववामनेत्रे॥उंनमः॥इत्यंगुष्ठेनदक्षिणक

र्णौ॥ऊं नमः॥इति तेनैव वामकर्णौ॥ऋं नमः॥इति कनिष्ठां
॥१५॥गुष्ठाभ्यां दक्षिणनासिकायां॥ॠं नमः॥इति ताभ्यामे
व वामनासिकायां॥ऌं नमः॥इति तर्जनीमध्यमाना
मिकाभिर्दक्षिणगंडे॥ॡं नमः॥इति ताभिरेव वामग
डे॥एं नमः॥इति मध्यमयोर्ध्वोष्ठे॥ऐं नमः॥इति तयैवा
धरोष्ठे॥ओं नमः॥इत्यनामामध्यमाभ्यामूर्ध्वदंतपंक्तौ॥
औं नमः॥इति ताभ्यामेव अधोदंतपंक्तौ॥अं नमः॥इति
मध्यमयाकंस्पृशेत्॥अः नमः॥इत्यनामामध्यमाभ्यां ॥१५॥

मुखे॥अतऊर्ध्वमनयैवमुद्रयावामपादाग्रां तंन्यसेत्॥
कं नमः॥दक्षिणबाहुमूले॥खं नमः॥कूर्परे॥गं नमः॥
मणिबंधे॥घं नमः॥अंगुलिमूले॥ङं नमः॥अंगुल्यग्रे॥
चं नमः॥वामबाहुमूले॥छं नमः॥कूर्परे॥जं नमः॥म
णिबंधे॥झं नमः॥अंगुलिमूले॥ञं नमः॥अंगुल्यग्रे॥
टं नमः॥दक्षिणपादमूले॥ठं नमः॥जानौ॥डं नमः॥गु
ल्फे॥ढं नमः॥अंगुलिमूले॥णं नमः॥अंगुल्यग्रे॥तं न
मः॥वामपादमूले॥थं नमः॥जानौ॥दं नमः॥गुल्फे॥

धंनमः॥अंगुलिमूले॥नंनमः॥अंगुल्यग्रे॥पंनमः॥इ
॥१६॥ तिकनिष्ठानामिकामध्याभिर्दक्षिणपार्श्वे॥फंनमः॥
इतिताभिरेववामपार्श्वे॥बंनमः॥इतिताभिरेवपृष्ठे॥
भंनमः॥इतिताःसांगुष्ठानाभौ॥मंनमः॥सर्वाभिरु
दरे॥यंनमः॥इतितलेनहृदये॥रंनमः॥इतिसर्वांगु
लिभिर्दक्षिणांसे॥लंनमः॥इतिताभिःककुदि॥वं
नमः॥इतिताभिरेववामांसे॥शंनमः॥इतितलेनहृ
दयादिदक्षिणकरांतं॥अतऊर्ध्वमनयैवमुखांतन्य ॥१६॥

सेत्॥षंनमः॥इतितेनैवहृदयादिवामकरांतं॥संनमः॥
इतिहृदयादिदक्षिणपादांतं॥हंनमः॥इतिहृदयादिवाम
पादांतं॥ळंनमः॥इतिहृदयाद्युदरांतं॥क्षंनमः॥इतिहृ
दयादिमुखांतं॥इतिमातृकान्यासः॥अथप्राणायामः॥
यथा॥क्रींइतिबीजेषोडशवारंजपन्नाभिनसयावायु
मापूर्यतत्रचतुःषष्टिवारंजपेनकुंभंकृत्वातत्रैव
त्रिंशद्वारंजपेनदक्षिणनासयावायुरेचयेत्॥पुनर्दक्षि
णेनापूर्योभाभ्यांकुंभयित्वावामेनरेचयेत्॥ततोवामे

नाभापूर्योभाभ्यांकुंभमुद्रांबध्वादक्षिणेनरेचयेत्॥इतिप्राणा
॥१७॥यामत्रयंकृत्वापीठन्यासंकुर्यात्॥हृदिउपर्युपरि॥ॐआ
धारशक्तयेनमः॥ॐमूलप्रकृतयेनमः॥ॐकूर्मायन
मः॥ॐशेषायनमः॥ॐवराहायनमः॥ॐपृथिव्यैनमः॥
ॐसुधार्णवायनमः॥ॐमणिद्वीपायनमः॥ॐचिंताम
णिगृहायनमः॥ॐश्मशानायनमः॥ॐपारिजाताय
नमः॥तन्मूले॥ॐरत्नवेदिकायैनमः॥तदुपरि॥ॐ
मणिपीठायनमः॥चतुर्दिक्षु॥ॐमुनिभ्योनमः॥ ॥१७॥

ॐदेवेभ्योनमः॥ॐशिवाभ्योनमः॥ॐशवेभ्योनमःॐ
मुंडेभ्योनमः॥दक्षिणस्कंधे॥ॐधर्मायनमः॥वामस्कं
धे॥ॐज्ञानायनमः॥वामोरौ॥ॐवैराग्यायनमः॥दक्षि
णोरौ॥ॐऐश्वर्यायनमः॥मुखे॥ॐअधर्मायनमः॥वा
मपार्श्वे॥ॐअज्ञानायनमः॥नाभौ॥ॐअवैराग्यायन
मः॥दक्षिणपार्श्वे॥ॐअनैश्वर्यायनमः॥पृष्ठहृदि॥
ॐअनंतायनमः॥ॐआनंदकंदायनमः॥ॐसंविन्ना
लायनमः॥ॐसर्वतत्वात्मकपद्मायनमः॥ॐप्रकृति

मयपत्रेभ्योनमः॥ॐविकारमयकेसरेभ्योनमः॥ह्रीं
॥९८॥ पंचाशद्वर्णबीजाढ्यकर्णिकायैनमः॥अंसूर्यमंडला
यैनमः॥उंसोममंडलायैनमः॥मंवह्निमंडलायैनम
मः॥संसत्वायनमः॥रंरजसेनमः॥तंतमसेनमः॥क्षं
आत्मनेनमः॥अंअंतरात्मनेनमः॥पंपरमात्मनेनमः॥
ह्रींज्ञानात्मनेनमः॥ततःपूर्वादिकेसरेषु॥ॐइच्छाये
नमः॥ॐज्ञानायैनमः॥ॐक्रियायैनमः॥ॐकालि
न्यैनमः॥ॐकामदायिन्यैनमः॥ॐरत्यैनमः॥ॐरमै ॥९८॥

DR BHAU DAJI

प्रियायैनमः॥ओंनंदायैनमः॥कर्णिकायां॥ओंमनो
न्मायैनमः॥तदुपरि॥ऐंपरायैअपरायैपरापरायै
ह्रीं:सदाशिवमहाप्रेतपद्मासनायनमः॥इतिविन्य
स्यकरन्यादिन्यसेत्॥यथा॥अस्यश्रीदक्षिणकालि
कामंत्रस्यभैरवऋषिः॥उष्णिक्छंदः॥श्रीदक्षिणकालिका
देवता॥ममचतुर्विधपुरुषार्थसिध्यर्थेपूजनेवि
नियोगः॥शिरसिभैरवायऋषयेनमः॥मुखेउष्णिक्
छंदसेनमः॥हृदयेदक्षिणकालिकायैदेवतायैन

मः॥ततोवर्णन्यासः॥यथा॥अंआंइंईंउंऊंऋंॠंऌं
॥९९॥ ॡंनमःहृदि॥एंऐंओंऔंअंअः कंखंगंघंनमःदक्षिण
बाहौ॥ङंचंछंजंझंञंटंठंडंढंनमःवामबाहौ॥णंतं
थंदंधंनंपंफंबंभंनमःदक्षिणपादौमंयंरंलंवंशंषंसं
क्षंनमः॥इवामपादौततःकरांगन्यासौ॥यथा॥ॐकां
अंगुष्ठाभ्यांनमः॥ॐकींतर्जनीभ्यांस्वाहा॥ॐकूंमध्य
माभ्यांवषट्॥ॐकैंअनामिकाभ्यांहुं॥ॐकौंकनिष्ठि
काभ्यांवौषट्॥ॐकः करतलकरपृष्ठाभ्यांफट्॥ॐ ॥९९॥

कांहृदयायनमः॥इतितर्जनीमध्यमानामिकाभिः॥ॐ
कींशिरसेस्वाहा॥इतितर्जनीमध्यमाभ्यां॥ॐकूंशिखायै
वषट्॥इसंगुष्ठेन॥ॐकैंकवचायहुं॥इतिसर्वाभिः॥ॐ
कौंनेत्रत्रयायवौषट्॥इतितर्जनीमध्यमानामिकाभिः॥
वास्त्रं॥ ॐकः अस्त्रायफट्॥इति ताभिरेवानतोमूलेनसप्तधा
व्यापकंकृत्वाख ड्गमुद्रांबध्वा मीतियोनिमुद्रांदर्शयेत्
ख्यांभसुरनाशिनीरानवध्वंसिनीव्याख्यालेलिहा
नोचयथाविधिमुद्रांप्रदर्श्यध्यायेत्॥यथा॥करालव

दनांघोरांमुक्तकेशींचतुर्भुजांकालिकांदक्षिणां दिव्यांमुं
॥२०॥ डमालाविभूषितां॥सद्यश्छिन्नशिरःखड्गवामाधोर्ध्व
करांबुजां॥अभयंवरदंचैवदक्षिणोर्ध्वाधःपाणिकां॥म
हामेघप्रभांश्यामांतथाचैवदिगंबरीं॥कंठावसक्तमुं
डालीगलद्रुधिरचर्चितां॥कर्णावतंसतानीतशवयु
ग्मभयानकां॥घोरदंष्ट्राकरालास्यांपीनोन्नतपयोध
रां॥शवानांकरसंघातैःकृतकांचीहसन्मुखीं॥सृक्कद्व
यगलद्रक्तधाराविस्फुरितानना॥घोररावांमहारौद्रीं ॥२१॥

श्मशानालयवासिनीं॥बालार्कमंडलाकारलोचनत्रि
तयान्वितां॥दंतुरांदक्षिणव्यापिमुक्तालंबिकचोच्च
यां॥शवरूपमहादेवहृदयोपरिसंस्थितां॥शिवाभि
र्घोररावाभिश्चतुर्दिक्षुसमन्वितां॥महाकालेनचस
मंविपरीतरतातुरां॥सुखप्रसन्नवदनांस्मेराननस
रोरुहां॥एवंसंचिंतयेत्कालींसर्वकामार्थसिद्धिदां॥
इतिध्यात्वामानसोपचारैःपूजयेत्॥यथा॥मूलं
त्रपद्मासनंश्रीदक्षिणकालिकायैनमः॥एवंसह

स्नानीयं॥ ॐ नमो धर्म्मायेति तदमृतमाचमनीयं॥ ॐ नमो विमलायेति तत्तलात्मकं गंधं॥ इंद्रियात्मकं पुष्पं॥ वायुरूपं धूपं॥ तेजोरूपं दीपं॥ अंबरात्मकं चामरं॥ सूर्यात्मकं दर्पणं॥ चंद्रात्मकं छत्रं॥ पद्मात्मिकां मेखलां॥ आनंदात्मकं हारं॥ अनाहतध्वनिमयीं घंटां॥ क्षीरदधिघृतमधुशर्करापर्वतं चनैवेद्यं॥ मनोरूपं नर्तकं॥ इतिमनसाराध्य क्षमाप्यबाह्यपूजामारभेत॥ यथा॥ स्ववामेभृंगभृंगिरिटिकोणं तदुपरिरत्नं तदुपरिचतु ॥२॥

अत्रपूर्ववत्सामान्यार्घ्यसंस्थापनविशेषार्घ्यस्थापयेत्॥ यथा॥

स्त्रंमंडलंविलिख्यतत्र॥ ॐ आधारशक्तयेनमः॥ इतिमंत्रेणाधारशक्तिंसंपूज्यत्रिपादिकामारोप्यफडितिप्रक्षालितंरंरंवंत्रिपादिकायांनिधायनमइतिमंत्रेणगंधपुष्पाक्षतयवकुशाग्रतिलसर्षपदूर्वाकुशानूतत्रनिःक्षिप्यविमलजलेनक्षंक्षंहंसंपंसंवंलंरंयंमंभंवंफंपंनंधंदंथंतंणंढंडंठंटंञंझंजंछंचंङंघंगंखंकंअःअंओंऔंएंऐंऌंऋंॠंऊंउंईंइंआंअं॥ इतिनेनमूलेनचपूरयेत्॥ ततःमंवह्निमंडलायदशकलात्मनेनमः॥ इ

त्रिपादिकायांसंपूज्य॥अंसूर्यमंडलायद्वादशकलात्म
नेनमः॥इतिरंखे॥उंसोममंडलायषोडशकलात्मनेन
मः॥इतिजलेसंपूज्यपूर्ववत्ब्रह्मांडोदरेतितीर्थान्या
वाह्यमूलंश्रीदक्षिणकालिकेइहावहइहातिष्ठतिस्वह
त्लांदेवतांतत्रावाह्यहुंस्त्रंवंह्यंवषडितिगालिनीमुं
द्रांप्रदर्श्यवौषडितितज्जलंवीक्ष्य॥ॐकांहृदयायनमः॥
इतिआग्नेय्यां॥ॐकींशिरसेस्वाहा॥इतैशान्यां॥ॐ
कूंशिखायैवषट्॥इतिनैर्ऋत्यां॥ॐकैंकवचायहुं॥ ॥२३॥

इतिवायव्यां॥ॐकौंनेत्रत्रायवौषट्॥इत्यग्रे॥ॐकः
अस्त्रायफट्॥इतिचतुर्दिक्षुरंखेपूजयेत्॥अंगपू
जनेदिङ्न्यासोयथा॥आत्मदेवतयोर्मध्येमार्ची॥तद्
क्षिणंदक्षिणं॥तत्पश्चिमंपश्चिमं॥तदामुत्तरं॥एवं
दिगष्टकंपरिकल्प्यअंगानिपूजयेत्॥ततःमूलंए
तेगंधपुष्पेश्रीदक्षिणकालिकायेनमः॥इतिगंध
पुष्पाभ्यांदेवतांसंपूज्यतदुपरिमत्स्यमुद्रयाछा
द्यमूलंदत्वाधेनुहावंइतिधेनुमुद्रयामृतीकृत्य

फडिति संरक्ष्य भूतिनी योनिमुद्रां प्रदर्श्य तज्जलं किंचि
॥अ॥त्प्रोक्षणीपात्रे निःक्षिप्य मूलेनैवोदकेनात्मानं पूजो
पकरणं चाभ्युक्ष्य पीठं पूजयेत्॥ यथा॥ स्वर्णादिपिष्टैर्गो
रोचनाकुंकुमादिलिप्तैर्वाय्वादीशपर्यंतं॥ॐ गुरुभ्यो
नमः॥ॐ परमगुरुभ्यो नमः॥ॐ परापरगुरुभ्यो नमः॥
पीठस्य दक्षिणे॥ॐ गणेशायनमः॥ मध्ये॥ॐ आधा
रशक्तयेनमः॥ॐ मूलप्रकृतयेनमः॥ॐ कूर्मायनमः॥
ॐ शेषायनमः॥ॐ वराहायनमः॥ॐ पृथिव्यैनमः॥३॥

ॐ सुधार्णवायनमः॥ॐ मणिद्वीपायनमः॥ॐ चिंतामणि
गृहायनमः॥ॐ श्मशानायनमः॥ॐ पारिजातायनमः॥
ॐ रत्नवेदिकायैनमः॥ॐ मणिपीठायनमः॥ चतुर्दिक्षु॥
ॐ मुनिभ्योनमः॥ॐ देवेभ्योनमः॥ॐ शिवाभ्योनमः॥ॐ
मुंडेभ्योनमः॥ आग्नेय्यां॥ॐ धर्मायनमः॥ नैर्ऋत्यां॥ॐ ज्ञा
नायनमः॥ वायव्यां॥ॐ वैराग्यायनमः॥ ऐशान्यां॥ॐ ऐश्व
र्यायनमः॥ पूर्वे॥ॐ अधर्मायनमः॥ दक्षिणे॥ॐ अज्ञानायन
मः॥ पश्चिमे॥ॐ अवैराग्यायनमः॥ उत्तरे॥ॐ अनैश्वर्मा

यनमः॥मध्ये॥ॐअनंतायनमइत्यादिपीठमनंतंपूर्ववत्सं
॥२४॥ पूज्य॥तस्मिन्पीठेप्रक्षालितंयंत्रंसंस्थाप्यपूजयेत्॥यंत्रंय
था॥आदौबिंदुंस्वबीजंभुवनेशीत्रिकोणंतस्यतनउपर्युपरि
पंचत्रिकोणानिविलिख्यतदुपरिवृत्तंतदुपर्यष्टदलंतदुप
रिषोडशदलंततश्चतुर्द्वारात्मकंभूपुरंविलिखेत्॥ततःपुष्पां
जलिंबध्वापूर्ववध्यात्वाहृदयामूलमंत्रेणतेजोमयींवह
न्तीमात्मपुटात्पुष्पांजलावानीयमूलेनकल्पितमूर्तौवा
हयेत्॥यथा॥ॐदेवेशिभक्तिसुलभेपरिवारसमन्विते॥२४॥

यावत्वांपूजयिष्यामितावत्त्वंसुस्थिराभव॥मूलंश्रीदक्षि
णकालिकेइहावह२मूलंश्रीं२केइहतिष्ठ२मूलंश्रीं२के२
हसंनिधेहि२मूलंश्रीं२केइहसंनिरुध्यस२इत्यावाहन्या
दिमुद्राःप्रदर्श्यहृदयेनसंकल्प्यअंगमंत्रैःसकलीकृत्यं
इतिधेन्वामृतीकृत्यपरमीकरणमुद्रयापरमीकृत्यभूति
न्यासकरणीयोनिमुद्राःप्रदर्श्यप्राणप्रतिष्ठांकुर्यात्॥य
था॥लेलिहामुद्रयायंत्रेहस्तंदत्वा॥ओंह्रींक्रींयंरंलंवंशं
षंसंहंसःअस्याःदक्षिणकालिकायाःप्राणाइहप्राणाः॥

ओं११अ०याःजीवद्दास्थितः॥ओं११अ०याःसर्वेंद्रियाणि॥
॥२५॥ ओं११अ०याःवाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणप्राणा
इहागत्यसुखंचिरंतिष्ठंतुस्वाहा॥एवंप्राणान्प्रतिष्ठाप्यपू
जयेत्॥यथा॥मूलंइदमासनंश्रीदक्षिणकालिकायेन
मः॥एवंमूलंएतत्पाद्यंश्री०नमः॥मूलंएतदर्घ्यंश्री०स्वा
हा॥मूलंएतदाचमनीयंश्री०स्वधा॥मूलंएतत्स्नानीयंश्री०
नमः॥मूलंएतद्वस्त्रयुग्मंश्री०नमः॥मूलइमानिभूषणा
निश्री०नमः॥मूलंएषगंधःश्री०नमः॥मूलंइमानिपु ॥२५॥

ष्पाणिश्री०वौषट्॥ततोमूलेनशिरोहृत्पादसर्वांगेषुपं
चपुष्पांजलिंदत्वामूलंश्रीदक्षिणकालिकेआवरणंतेपू
जयामीत्यनुज्ञांगृहीत्वाआवर्णैरेपूजांकुर्यात्॥यथा॥
यंत्रेवायजारीशांतंगुरुपंक्तित्रयंपूजयेत्॥यथा॥ॐम
हादेवानंदनाथायनमः॥ॐमहादेवानंदनाथायनमः॥ॐत्रि
पुरांबायैनमः॥ॐभैरवानंदनाथायनमः॥एतेदिव्यौघाः॥
ॐब्रह्मानंदनाथायनमः॥ॐपूर्णानंदनाथायनमः॥
ॐचलचित्तानंदनाथायनमः॥ॐचलाचलानंदनाथा

यनमः॥ॐकुमारानंदनाथायनमः॥ॐक्रोधनानंदना
॥२६॥ थायनमः॥ॐवरदानंदनाथायनमः॥ॐस्मरदापनानं
दनाथायनमः॥ॐमायावायैनमः॥ॐमायावसंवायै
नमः॥एतेमंत्रीघाः॥ॐविमलानंदनाथायनमः॥ॐकु
शलानंदनाथायनमः॥ॐभीमसेनानंदनाथायनमः॥
ॐसुधाकरानंदनाथायनमः॥ॐमीनानंदनाथाय
नमः॥ॐगोरक्षानंदनाथायनमः॥ॐभोजदेवानंदना
थायनमः॥ॐप्रजापत्यानंदनाथायनमः॥ॐमूलदे ॥२६॥

वानंदनाथायनमः॥ॐरंतिदेवानंदनाथायनमः॥ॐ
विघ्नेशानंदनाथायनमः॥ॐकुतारानानंदनाथाय
नमः॥ॐसमयानंदनाथायनमः॥ॐसंतोषानंदना
थायनमः॥ॐगुरुभ्योनमः॥ॐपरमगुरुभ्योनमः॥
ॐपरापरगुरुभ्योनमः॥ॐपरमेष्ठीगुरुभ्योनमः॥ततः
केसरेषुपूर्वोक्तप्रकारेणअंगानिपूजयेत्॥ततोबाह्य
त्रिकोणद्वये॥बहिषट्कोणे॥ॐकाल्यैनमः॥ॐकपालि
न्यैनमः॥ॐकुल्लायैनमः॥ॐकुरुकुल्लायैनमः॥ॐ

विरोधिन्यैनमः॥ॐविप्रचित्तायैनमः॥ततःअंतरक्ष्य
॥२॥ स्रे॥ॐउग्रायैनमः॥उग्रप्रभायैनमः॥ॐदीप्तायैन
मः॥ततोद्वितीयत्र्यस्रे॥ॐनीलायैनमः॥ॐघनायै
नमः॥ॐबलाकायैनमः॥ततस्तृतीयत्र्यस्रे॥ॐमा
त्रायैनमः॥ॐमुद्रायैनमः॥ॐमितायैनमः॥सर्वा
श्यामाअसिकरामुंडमालाविभूषणाः॥तर्जनीवाम
हस्तेनधारयंत्यःखचिस्मिताः॥दिगंबराहसन्मुख्यः
सस्ववाहनभूषिताः॥एवंध्यात्वाअर्चयेत्॥ततोअ ॥२॥

ष्टरलेषुपूर्वादिक्रमेण॥ॐब्राह्म्यैनमः॥ॐनारायण्यै
नमः॥ॐमाहेश्वर्यैनमः॥ॐचामुंडायैनमः॥ॐकौ
मार्यैनमः॥ॐअपराजितायैनमः॥ॐवाराह्यैनमः॥
ॐनारसिंह्यैनमः॥ततोभूग्रहेपूर्वादि॥ॐलंइंद्राय
वज्रहस्तायसुराधिपतयेऐरावतवाहनायसांगाय
सपरिवारायनमः॥ॐरंअग्नयेशक्तिहस्तायतेजो
धिपतयेमेषवाहनायसांगायसपरिवारायनमः॥
ॐयंयमायदंडहस्तायप्रेताधिपतयेमेषवाहनाय हि-

यसांगायसपरिवारायनमः॥ॐक्षंनिर्ऋतयेरक्षो
॥२८॥ स्तायरक्षोधिपतयेप्रेतवाहनायसांगायसपरिवा
रायनमः॥ॐवंवरुणायपाशहस्तायजलाधिपत
येमकरवाहनायसांगायसपरिवारायनमः॥ॐयं वा
यवेअंकुशहस्तायप्राणाधिपतयेमृगवाहनायस
गायसपरिवारायनमः॥ॐकुं कुबेरायगदाहस्त
यनिधाधिपतयेनरवाहनायसांगायसपरिवार
यनमः॥ॐहांईशानायत्रिशूलहस्तायविद्याधि

DR BHAU DAJI

पतयेवृषभवाहनायसांगायसपरिवारायनमः॥ऊंईशा
नयोर्मध्ये॥ॐआंब्रह्मणेपद्महस्तायलोकाधिपतये
हंसवाहनायसांगायसपरिवारायनमः॥निर्ऋतिव
रुणयोर्मध्ये॥ॐह्रींअनंतायचक्रहस्तायनागाधिप
तयेकूर्मवाहनायसांगायसपरिवारायनमः॥तद्बहिः॥
ॐवज्रायनमः॥ॐशक्तयेनमः॥ॐदंडायनमः॥ॐ
खड्गायनमः॥ॐपाशायनमः॥ॐअंकुशायनमः॥
ॐगदायेनमः॥ॐत्रिशूलायनमः॥ॐपद्मायनमः॥

ॐ वक्रायनमः॥इत्यावरणंसंपूज्यमूलेनपुष्पांजलित्र
॥२९॥ यंदत्वादेव्यादक्षिणेभागेमहाकालंपूजयेत्॥यथाॐ
क्षौंयांरांलंवांभांक्रोंमहाकालभैरवसर्वविघ्नान्नो
रयह्रींश्रींफट्स्वाहा॥इतिमंत्रेणपाद्यादिभिःसंपूज्य
तर्पयेत्॥ततोधूपदीपौदद्यात्॥यथा॥धूपपात्रमस्त्रे
णप्रोक्ष्यनममइतिसंपूज्यमूलंइदंधूपंश्रीदत्तेसा
गायेसपरिवारायनमइतिजलमुत्सृज्य॥ॐजलध्व
निमंत्रमस्वाहेतिघंटांसंपूज्यवामहस्तेनवादयं ॥३०॥

दक्षिणहस्तेननीचेधूपंदद्यात्॥तत्पात्रंदेव्यावामेस्था
पयेत्॥एवंदीपमपिदद्यात्॥मूलंइदंदीपंश्रीनमः॥इ
तिघृतदीपंदृष्टिपर्यंतमुत्सार्यदेव्यादक्षिणेस्थापयेत्॥
ततोमूलेनपुष्पांजलित्रयंदत्वासत्पात्रेनैवेद्यंपुरतःसं
स्थाप्यमूलेनपाद्याचमनीयंदत्वाफडितिनैवेद्यंप्रो
क्ष्यचक्रमुद्रयामिरुध्यधेनुमतीकृत्यगंधपुष्पैस
पूज्यतदुपरिमूलमुद्धाज्य्वामूलंइदंनैवेद्यंश्रीं
नमःइतिजलमुत्सृज्यप्राणायस्वाहेत्यादिपंच

मंत्रैः प्राणाहुतीर्दत्वा भुज्यमानांरेवतां ध्यात्वापनीय
॥३०॥ मुदकं दत्वा नित्यहोमं कुर्यात्॥ यथा॥ दक्षिणेस्थाउ
लं कृत्वा विधिवदग्निमादाय॥ॐ कव्यादेभ्यो नमः
स्वाहा॥ कव्यादांश्च परिसमूह्य मूलमन्त्रेण कुंडे स्रुचिले भू
मौवावह्निं निधायआज्यमानीयमुद्रयावदाय॥ॐ
भूःस्वाहा॥ॐ भुवःस्वाहा॥ॐ स्वःस्वाहा॥ॐ कांहृद
यायनमःस्वाहेत्यादिषडाहुतीर्हुत्वाग्नेर्देवीमावाह्य
गंधपुष्पैरभ्यर्च्यस्वाहांतेनमूलेनषोडशाहुतीर्हुत्वा ॥३१॥

स्रुत्वानलासंहारमुद्रयोद्वास्यपीठस्थमूर्तेसंयोज्यव
ह्निं मंडलेविसर्जयेत्॥ इतिनित्यहोमंकृत्वादेवीतृप्ता
मितिध्यात्वापुनराचमनीयंदत्वात्रिस्तर्पयित्वामूलंइदं
तांबूलश्रीनमः॥ इतितांबूलंदत्वापुनःपंचोपचा
रैःसपरिवारांदेवतांसंपूज्यत्वाबलिंदद्यात्॥ स्वाग्नेर्दि
क्कोणचतुरस्रंमंडलंकृत्वाभ्यर्च्यइत्यभिमंत्रसाधार
पात्रंनिधायफडितिप्रोक्ष्यनमइत्यभ्यर्च्यतद्गा
गुष्ठानामिकाभ्यांस्पृष्ट्वामूलंइमंबलिंश्रीनरसिंगी

तैःसंतोष्यजयेत्कौशलेनपुष्पांजलिंदत्वाआरार्तिकं
॥३१॥कृत्वानमः॥इतिजलमुत्सृज्यमूलेनत्रिःप्राणानायम्यमा
लांमूलेनास्पृश्य॥ॐह्रींमालेमालेमहामायेसर्वशक्ति
स्वरूपिणि॥चतुर्वर्गस्त्वयिन्यस्तस्तस्मान्मेसिद्धिदाभ
वेतिसंपूज्यगंह्रींगंअविघ्नंकुरुमालेत्वमितिदक्षिण
करेमालांगृहीत्वाशिरसिगुरुंहृदिदेवींध्यायमूलमंत्र
मष्टोत्तरंशतंजपेत्॥जपांतेमालांशिरसिनिधायपु
नस्त्रिःप्राणानायम्यहृदयेतिमंत्रेणदेव्यावामकरे ॥३२॥

जपंसमर्प्य॥ओंतंमालेसर्वदेवानांप्रीतिदाशुभदामता॥
शुतेनसत्येनमेसिद्धिंदेहिमातर्नमोस्तुते॥इतिमालांसं
गोप्यपुष्पांजलिंदत्वाकपूरादिस्तुतिभिस्तुत्वाष्टांगंप्रण
म्यत्रिःप्रदक्षिणीकृत्यचुलुकोदकमादाय॥ॐइतःपूर्वंप्रा
णबुद्धिशरीरधर्माधिकारतोजाग्रत्स्वप्नसुषुप्तावस्था
सुमनसावाचाकर्मणाहस्ताभ्यांपद्भ्यामुदरेणशिश्ना
यत्स्मृतंयदुक्तंयत्कृतंतत्सर्वंब्रह्मार्पणमस्तुस्वाहा॥मां
मदीयंसकलंश्रीदक्षिणकालिकादेवतायैनिवेदयामि

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

नमः ॐ तत्सत् ॥ इत्यात्मानं निवेद्यपुष्पांजलिं दत्वावरणदेव
॥३२॥ तादेव्यंगे विलाप्य ॥ ऊर्ध्वउत्तरशिखरेदेविभूम्यांपर्वतमूर्ध्व
वासिनि ॥ ब्रह्मयोनिसमुत्पन्नेगच्छदेविममांतरं ॥ दक्षिण
कालिकेक्षमस्वेतिविसृज्यसंहारमुद्रयाततेनपुष्पैःसार्धं
स्वहृदयमानयेत् ॥ ततएशान्यांमंडलिकांकृत्वातत्रनिर्मा
ल्यनैवेद्यशेषाभ्यामुछिष्टचंडालीसंपूज्यपात्रोदकंपीत्वानि
र्माल्यंशिरसिधृत्वानैवेद्यंस्वीकृत्यदेवीमयमात्मानंमत्वामू
लेनाष्टोत्तरशतामिमंत्रितंगंधपुष्पंधृत्वाकर्मेश्वरार्पणं ॥३२॥

कृत्वायथासुखंविहरेत् ॥ इतिदक्षिणकालिकायाएक
क्ष्यक्षरमंत्रयोःपद्धतिःसमाप्तः ॥ ॥छ॥छ॥छ॥छ॥